P: ISSN NO.: 2394-0344 RNI No.UPBIL/2016/67980 VOL-3* ISSUE-2* (Supplementary Issue) May- 2018
*Remarking An Analisation*

# आधुनिकपारम्परिकशिक्षाशास्त्रप्रशिक्षणसंस्थासु प्रयुज्यमानानां विभिन्नव्याकरणपाठयोजनानां समीक्षणया आदर्शव्याकरणपाठयोजनायाः स्वरूपम्



**आर्. एल्. नारायणसिंहः**
सहायकाचार्यः,
शिक्षाशास्त्रविभागः,
दयालबाग एजुकेशनल इन्स्टीट्यूट,
आगरा



**आर्. शिवरामकृष्णसिंहः**
सहायकाचार्यः,
शिक्षाशास्त्रविभागः,
राष्ट्रियसंस्कृतसंस्थानम्,
नवदेहली

**सारांशः**

कक्षाशिक्षणात्प्राक् अध्यापकेन निर्दिष्टे समये सम्पूर्णनिश्चितपाठयांशस्य निर्दिश्टशिक्षणोद्येश्यानां सम्पूर्णतया प्राप्त्यर्थं छात्राध्यापकयोः जायमानानाम् अन्तःक्रियाणां विधिप्रविधीनां सामग्रीणाञ्च समाकलनात्मकपूर्वरङ्गसिद्वता एव पाठयोजनेति कथ्यते।

हर्बर्ट्वर्यस्य मस्तिष्कीयः अनुभवग्रहणात्मकः सिद्धान्तः तदीयसिद्धान्ताधारिता पंञ्चपदात्मिका पाठयोजना आधुनिकशिक्षामनोविज्ञानेन पञ्चाशद्वर्षेभ्यः पूर्वमेव तिरस्कृता। आधुनिकशिक्षामनोविज्ञानेन अधिगमविषये नैकान् प्रयोगान् विधाय अनेके अधिगमसिद्धान्ताः प्रत्यपादिषत। किञ्च अभिनवेन मनोविज्ञानगतेन संज्ञानात्मकवादेन ज्ञानेन्द्रियाणं ज्ञानग्रहणमननधारणरीतयः सप्रयोगं निरूप्य नवनवसिद्धान्ताः न्यरूपिषत। एवम्भूतान् सिद्धान्तानाधृत्य काले काले नैकाः अधिगमपद्धतयः, पाठयोजनाप्रकाराश्च न्यरूपिषत। इमाश्च पद्धतयः पाठयोजनाप्रकाराश्च नैकाभिः शिक्षकप्रशिक्षणसंस्थाभिः ससाफल्यमनुप्रयुज्यन्ते। परं संस्कृतशिक्षकप्रशिक्षणसंस्थानामियं शोचनीया स्थितिः यदिमाः संस्थाः नाद्यावधि नूतन पाठयोजनाप्रकारानध्येतुम् अनुप्रयोक्तुं वा सन्नाद्धा न सन्ति। अस्माद्धेतोरेव समेष्वपि विद्यापीठेषु प्रतिविद्यापीठमेकप्रकारा पाठयोजना अनुप्रयुज्यते। न केवलमेतत्, तत्तद्विद्यापीठेष्वपि पाठयोजना विषये प्रशिक्षकाणामैकमत्यं न दृश्यते। यदीदृशी स्थितिरग्रेपि अनुवर्तेत तर्हि संस्कृतप्रशिक्षणस्य गुणवत्ता शीघ्रमेव नङ्क्ष्यति। गभीरसमस्यामेनामवगत्यैव अनुसन्धात्रा संस्कृतपाठयोजनायाः गुणवत्ताविकासार्थं शास्त्रीयमध्ययनं विधाय आदर्शव्याकरणपाठयोजनायाः निर्माणं इत्थं निहितवान्।

**आदर्शव्याकरणपाठयोजनायाः निर्माणप्रक्रियाः**

प्रथमं सर्वेक्षणविधिना शिक्षकप्रशिक्षणसंस्थाभ्यः विभिन्नभाषापाठयोजनाः सङ्कलिताः। संङ्कलितानां तासां पाठयोजनानां गुणदोषविमर्शनपुरस्सरं काचित् प्रश्नावली निर्मिता। प्रश्नावलीयं विभिन्नसांख्यकीय प्रक्रियाभिः अनुसन्धानप्रविधिभिश्च प्रमाणीकृता। प्रमाणीकृतप्रश्नावल्या अनया पुनस्सर्वेक्षणविधिना विविधशिक्षाशास्त्रविद्वद्भ्यः आचार्येभ्यः अध्यापकेभ्यश्च दत्तांशसंग्रहणं विहितम्। दत्तांशसंग्रहणस्यास्य विश्लेषणं विभिन्न सांख्यकीयप्रविधिभिः व्यधीयत।

पश्चात् पाठयोजनायां के के विन्दवः, के स्तम्भाः, कानि कानि सोपानानि भवेयुः इति प्रश्नावलीद्वारा दत्तांशसंग्रहणं कृत्वा प्राप्तफलानां विश्लेषणञ्च विहितम्। अनन्तरं पञ्चबिन्दुप्रश्नावल्या हर्बर्ट, ब्लूम्स्, जान डयूयी, किल्पेट्रिक इत्येतेषां सोपनानि तथा उद्देश्येषु कानि कथमुपयोक्तव्यानीति ज्ञातम्। अत्र अनिवार्यरूपेण अधिकशिक्षाशास्त्रिभिः सूचितबिन्दवः अनिवार्यरूपेण, सान्दर्भिकरूपेण सूचितबिन्दवः सान्दर्भिकरूपेण, प्रारूपे संस्थाप्य आदर्शव्याकरणपाठयोजनायाः प्रारूपं निर्मितम्। इदानीं शिक्षाशास्त्रविद्वद्भिः प्रश्नावल्यां सूचितरीत्या आदर्शपाठयोजनाप्रारूपाणि प्रदर्श्यन्ते।

**आदर्शसंस्कृतव्याकरणपाठयोजनाप्रारूपम्**

**प्राथमिकांशाः**

1. छात्राध्यापकस्य / छात्राध्यापिकायाः नाम
2. विद्यालयस्य नाम
3. दिनाङ्कः
4. अन्तरम्
5. अवधिः
6. कक्ष्यावर्गः
7. छात्रसंख्या
8. छात्राणां मध्यायुः
9. विषयः – पाठप्रकारः
10. पाठयांशः
11. प्रकरणम

**पाठयवस्तु / औपचारिकपाठ्यबिन्दवः**

**उद्येश्यानि**

**सामान्योद्येश्यानि**

1. संस्कृतभाषायाः स्वरूपस्य स्वभावस्य च परिचयः।
2. सन्धीनां स्वराणां विपरिणामस्य ज्ञानम्।
3. उदाहरणानां, सन्धिनियमाणां च ज्ञानम्।
4. सन्धिनियमाणां भाशायां प्रयोगस्य ज्ञानम्।
5. छात्राणां संस्कृतभाषायाः ध्वनितत्वैः परिचायनम्।
6. छात्राणं शब्दकोशाभिवर्धनम्।
7. छात्राणां शुद्धवाक्यरचनायाः कौशलोत्पादनम्।
8. चतुर्षुकौशलेषु ज्ञानसम्पादनम्।

**विशिष्टोद्येश्यानि**

**ज्ञानात्मकानि**

( सन्धिसमासयुक्तपदानां परिचयसम्पादनम्।)

**अवबोधात्मकानि**

(सन्धिसमासयुक्तपदानां नियमावबोधः।)

**कौशलात्मकानि**

(संश्लेषणात्मकविश्लेषणात्मकानां सन्धिसमासादीनाम् अभिज्ञानकौशलसम्पादनम्।)

**अभिरूच्यात्मकानि**

(व्याकरणप्रयोगे भाषायाम् अभिरूच्युत्पादकानि कार्याणि लेखनीयानि।)

**उपकरणानि**

**सामान्योपकरणानि**

पाठ्यपुस्तकम्
कृष्णफलकम्
सुधाखण्डः
सूचीदण्डः
मार्जनी
} एतान्यनिवार्यरूपेण भवन्ति।

आकुड्चनश्यामफलकम्
करपत्राणि
कोशाः
} सन्दर्भानुगुणं लेख्यानि।

**विशिष्टोपकरणानि**

1. दृश्योपकरणानि
2. श्रव्योपकरणानि
3. दृश्यश्रव्योपकरणानि

} सन्दर्भानुगुणं प्रलेख्यानि।

**पूर्वज्ञानम्**

(प्रस्तावनाप्रस्तुत्यर्थं वक्ष्यमाणविषयसम्बद्धः छात्राणां पूर्वाधारितः अंशः कः इति उल्लेखनीयः।)

**पाठने विशिष्टप्रयोगाः**

(अत्र वक्ष्यमाणपाठ्यांशे निश्चितपाठयोजनायाः अनुगुणं तदतिरिच्य वा कोऽपि प्रयोगः अर्थात् नूतनविधीनां प्रविधीनामुपयोगः यदि क्रियते तर्हि ससन्दर्भानुगुणं लेखनीयः)

P: ISSN NO.: 2394-0344 RNI No.UPBIL/2016/67980 VOL-3* ISSUE-2* (Supplementary Issue) May- 2018
*Remarking An Analisation*

**(सोपानमिदं सान्दर्भिकम्)**

| **सोपानानि** | **पाठ्यवस्तु** | **लक्षिताधिगमविशेषाः** | **अध्यापकच्छात्रक्रिया** | **मूल्यांड्कनम्** |
|---|---|---|---|---|
| **प्रस्तावना**<br>(5 निमेषाः) | पूर्वज्ञानम् | अनुस्मारणम् / जिज्ञासोत्पादनम् | **अध्यापकः**–प्राक्प्रस्तुतव्याकरणणांशेन नियमं वक्ष्यमाणव्याकरणांशस्य सम्बद्धकल्पनम्। (उदाहरणानि प्रस्तूय विषयम् उपस्थापयति।)<br>**छात्राः**–(पाठने निमग्नाः भवन्ति।) | |
| **उद्देश्यकथनम्**<br>(2 निमेषाः) | (व्याकरणविषयः लेखनीयम्) | पाठोन्मुखीकरणम् | **अध्यापकः**– (अद्य वयं ......... विषयं पठामः इत्युक्त्वा श्यामपटे पाठ्यमानव्याकरणविषयस्य नाम लिखति।)<br>**छात्राः** –(जिज्ञासाभिरूचिं प्रकटयन्ति।) | |
| **उदाहरणप्रस्तुतीकरणम्**<br>(5–8 निमेषाः) | अध्यापनबिन्दवः, आगमनविधिना उदाहरणानि। | विषयोपस्थापनम् | **अध्यापकः** –(उदाहरणानि प्रस्तोश्यति) 'छात्रः विद्यालयं गच्छति' अत्र सन्धियुक्तं पदं किम्?<br>**छात्राः**–विद्यालयः।<br>**अध्यापकः** –अस्य सन्धिविच्छेदं करोतु।<br>**छात्राः**–विद्या + आलयः<br>**अध्यापकः** –कयोर्मध्ये सन्धिरभवत्?<br>**छात्राः**–आ + आ<br>**अध्यापकः** –द्वयोः मेलनेन किमक्षरमागतम्?<br>**छात्राः**–आ<br>**अध्यापकः** – एवमेतान्यन्यानि उदाहरणानि प्रस्तुत्य नियमकथनार्थं छात्रान् प्रेरयति। | |
| **नियमस्वरूपम्**<br>(2–3 निमेषाः) | उदाहरणानि | सामान्यीकरणम्। | **अध्यापकः** –(प्रस्तुतोदाहरणेषु साम्यवैषम्यं किमिति सूचयन्तु इति छात्रान् पृच्छति।)<br>**छात्राः** –(निष्कर्षं वदन्ति।) | |
| **नियमनिर्धारणं / सूत्रनिर्धारणम्**<br>(2–3 निमेषाः) | दत्तानि उदाहरणानि | पारिभाषीकरणम् / कल्पनाशक्तेः संवर्धनम् / संश्लेषणम्। | **अध्यापकः** – (पूर्वोक्तनिष्कर्षाधारेण नियमं कथयितुं प्रोत्साहनं करोति।)<br>**छात्राः** –(नियमं वदन्ति।) | |
| **सूत्रनिरूपणम्**<br>(3 निमेषाः) | उदाहरणानि | संक्षिप्तीकरणम् / सूत्रावगाहनम्। | **अध्यापकः**–(व्याकरणांशस्य पाणिनीयसूत्रमुक्त्वा नियममपि सूचयति।)<br>**छात्राः** (स्वनिष्कर्षं सूत्रं, पाणिनीयसूत्रञ्च तुलनात्मकतया परीशीलयन्ति।) | |
| **अनुप्रयोगः / विनिमयः**<br>(3 निमेषाः) | व्याकरणसम्बद्धानि नव्योदाहरणानि | विवेचनज्ञानसम्पादनं / नियमस्पष्टीकरणम् | **अध्यापकः** –(कतिपयोदाहरणानि प्रस्तूय विश्लेषणं संश्लेषणं च कारयति।)<br>**छात्राः** –(शब्दानां विश्लेषणं संश्लेषणं च कुर्वन्ति।) | |
| **सन्देहनिवृत्तिः / चर्चा**<br>(4 निमेषाः) | पाठितपाठयांशः | कल्पनाशक्तेः जागरणम् / सर्जनात्मकतायाः विकासः / पाठ्यांशे अधिकारसम्पादनम् / चिन्तनस्तराभिवर्धनम्। | **अध्यापकः** –(छात्रान् सन्देहान् प्रष्टुं सूचयति।तथैव विचारोत्तेजकसमस्यामुपस्थाप्य चर्चायाः आरम्भं करोति, छात्रसन्देहान् निवायति च।)<br>**छात्राः**–(पाठ्यांशे विद्यमानान् सन्देहान् पृच्छन्ति, चर्चायां स्वीयविचारान् प्रकटयन्ति।) | |
| **पुनरावृत्तिप्रश्नाः**<br>(2 निमेषाः) | उदाहरणानि | अधीतविषयस्य दृढत्वसम्पादनम्। | **अध्यापकः**–(पाठितपाठयांशसम्बद्धान् वस्तुनिष्ठप्रश्नान् पृच्छति।) | |

| | | | | |
|---|---|---|---|---|
| | | | **छात्रा :–** (समाधानानि ददति।) | |
| **कक्षाकार्यम्**<br>(3 निमेषः) | उदाहरणानि | ज्ञानस्य परीक्षणम्, आत्मनिरीक्षणम्। | **अध्यापकः** –(सम्पूर्णपाठ्यांशस्वरूपं निरीक्ष्य तत्सम्बद्धानि नूतनोदाहरणानि वदन्तु इति कथयति। तथैव स्वयमपि कतिपय उदाहरणानि प्रेरकरूपेण ददाति।)<br>**छात्राः–**(पाठयांशं निरीक्ष्य तत्सम्बद्धनूतनोदाहरणानि वदन्ति। प्रतिक्रियाञ्च यच्छन्ति।) | |
| **अनुप्रयोगः (गृहकार्यम्)**<br>(2 निमेषाः) | पाठितपाठ्यांशः | ज्ञातांशस्य दृढीकरणम् / लब्धस्य ज्ञानस्योपयोगः / रचनाकौशलं / नव्यज्ञानार्जनम् | **अध्यापकः** :–(श्यामफलके लक्षिताधिगमविशेषानुरूपं गृहकार्यं लिखति।)<br>**छात्रा :–**(स्वपुस्तिकासु लिखन्ति।) | |
| | | | | |

**आत्मनिरीक्षणम् (Teacher's Self Evaluation)**

(अध्यापकः अभिलषितव्यवहारपरिवर्तनार्थं पाठनानन्तरं स्वयं पाठिते विषये पाठनप्रकारे, कक्षानुशासने, उपकरणप्रयोगे च गुणदोषविमर्शनम् आत्मनिरीक्षणेन (Introspection) करोति। अत्र लिखति च।)

**निरीक्षकसूचनाः**

(पाठनसमये छात्राध्यापकस्य गुणदोषान् निरीक्षकः अत्र लिखति।)

**सहायकग्रन्थसूची**

1. *डा. सि. एच्. एल्. एन्. शर्मा (1996), संस्कृतशिक्षणम्, भारतमुद्रप्रकाशनम्, पुरूनाट्टुक्करा।*
2. *ज्ञाने धर्मः उत प्रयोगे (2000), संस्कृतभारती, नवदेहली।*
3. *डा. कानाल नलचक्रवर्ती (2001), संस्कृताध्यापनम् – श्रीवेङ्कटाम्बा पब्लिकेशन्स् , तिरूपतिः।*
4. *डा. वि. मुरलीधरशर्मा (2003), संस्कृतशिक्षणसमस्याः, राष्ट्रियसंस्कृतविद्यापीठम् तिरूपतिः।*
5. *डा. रमाकान्तमिश्रः (2006), शैक्षिकप्रविधिः, चौखम्बा विद्याभवन्, वाराणसी।*
6. *डा. सन्तोष् मित्तल् (2006), संस्कृतशिक्षणम्, जैपूर,।*